॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ९०

तथा तत्रासतस्तस्य भरतस्योपयायिनः ।
सैन्य रेणुश्च शब्दश्च प्रादुरास्तां नभः स्पृशौ ॥१॥

एतस्मिन्नन्तरे त्रस्ताः शब्देन महता ततः ।
अर्दिता यूथपा मत्ताः सयूथा दुद्रुवुर्दिशः ॥२॥

स तं सैन्यसमुद्भूतं शब्दं शुश्रव राघवः ।
तांश्च विप्रद्रुतान्सर्वान्यूथपानन्ववैक्षत ॥३॥

तांश्च विद्रवतो दृष्ट्वा तं च श्रुत्वा स निःस्वनम् ।
उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसं ॥४॥

हन्त लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया ।
भीमस्तनितगम्भिरस्तुमुलः श्रूयते स्वनः ॥५॥

राजा वा राजमात्रो वा मृगयामटते वने ।
अन्यद्वा श्वापदं किं चित्सौमित्रे ज्ञातुमर्हसि ।
सर्वमेतद्यथातत्त्वमचिराज्ज्ञातुमर्हसि ॥६॥

स लक्ष्मणः सन्त्वरितः सालमारुह्य पुष्पितम् ।
प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमवैक्षत ॥७॥

उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम् ।
रथाश्वगजसम्बाधां यत्तैर्युक्तां पदातिभिः ॥८॥

तामश्वगजसम्पूर्णां रथध्वजविभूषिताम् ।
शशंस सेनां रामाय वचनं चेदमब्रवीत् ॥९॥

अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ।
सज्यं कुरुष्व चापं च शरांश्च कवचं तथा ॥१०॥

तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह ।
अङ्गावेक्षस्व सौमित्रे कस्यैतां मन्यसे चमूम् ॥११॥

एवमुक्तस्तु रामेण लक्ष्माणो वाक्यमब्रवीत् ।
दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥१२॥

सम्पन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम् ।
आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः ॥१३॥

एष वै सुमहाञ्श्रीमान्विटपी सम्प्रकाशते ।
विराजत्युद्गतस्कन्धः कोविदार ध्वजो रथे ॥१४॥

भजन्त्येते यथाकाममश्वानारुह्य शीघ्रगान् ।
एते भ्राजन्ति संहृष्टा जगानारुह्य सादिनः ॥१५॥

गृहीतधनुषौ चावां गिरिं वीर श्रयावहे ।
अपि नौ वशमागच्छेत्कोविदारध्वजो रणे ॥१६॥

अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ।
त्वया राघव सम्प्राप्तं सीतया च मया तथा ॥१७॥

यन्निमित्तं भवान्राज्याच्च्युतो राघव शाश्वतीम् ।
सम्प्राप्तोऽयमरिर्वीर भरतो वध्य एव मे ॥१८॥

भरतस्य वधे दोषं नाहं पश्यामि राघव ।
पूर्वापकरिणां त्यागे न ह्यधर्मो विधीयते ।
एतस्मिन्निहते कृत्स्नामनुशाधि वसुन्धराम् ॥१९॥

अद्य पुत्रं हतं सङ्ख्ये कैकेयी राज्यकामुका ।
मया पश्येत्सुदुःखार्ता हस्तिभग्नमिव द्रुमम् ॥२०॥

कैकेयीं च वधिष्यामि सानुबन्धां सबान्धवाम् ।
कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥२१॥

अद्येमं संयतं क्रोधमसत्कारं च मानद ।
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥२२॥

अद्यैतच्चित्रकूटस्य काननं निशितैः शरैः ।
भिन्दञ्शत्रुशरीराणि करिष्ये शोणितोक्षितम् ॥२३॥

शरैर्निर्भिन्नहृदयान्कुञ्जरांस्तुरगांस्तथा ।
श्वापदाः परिकर्षन्तु नराश्च निहतान्मया ॥२४॥

शराणां धनुषश्चाहमनृणोऽस्मि महावने ।
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥२५॥

|

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com